E-ISSN-2584-2870 https://doi.org/10.65833/dbs.2026.330

केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः
देवभूमि-सौरभम्
E-ISSN 2584-2870
Devabhūmisaurabham

Vol 3 Issue 1 Jan-June 2026 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# अन्योन्याश्रयदोषपरिहारविचारः

## (हलन्त्यम्,आदिरन्त्येन सहेता इत्यनयोःहलन्त्यम्,न विभक्तौ तुस्माःइत्यनयोश्च विशेषसन्दर्भे)

**डॉ. लेखरामः दन्नाना**
**सहायकाचार्यः**
**संस्कृत-पालि-प्राकृतविभागः**
**इलाहाबाद-विश्वविद्यालयः,प्रयागराजः**
**दूरभाषः- 8668730993,7382691287**
**ईमेल – lekhramdannana@gmail.com**

**Abstract: - अभिसङ्क्षिप्तिका: -**

हलन्त्यमिति इत्सञ्ज्ञाविधायकं सूत्रम्। "न विभक्तौ तुस्माः" इति इत्सञ्ज्ञानिषेधसूत्रम्। विभक्तिघटकानां तवर्गसकारमकाराणाम् इत्संज्ञा निषिध्यते अनेन सूत्रेण। अतः"हलन्त्यमिति" उत्सर्गसूत्रम्,"न विभक्तौ तुस्माः" भवति अपवादसूत्रम्। अपवादसूत्रस्य वाक्यार्थबोधानन्तरम् उत्सर्गसूत्रस्य वाक्यार्थबोधः इति नियमोऽस्ति।"न विभक्तौ तुस्माः" इति सूत्रस्य अपवादतया तस्य पूर्वं वाक्यार्थबोधः आवश्यकः। परन्तु वाक्यार्थबोधे पदपदार्थोपस्थितिः कारणम् इत्यपि नियमो वर्तते। अत्र सूत्रे विभक्तिपदं वर्तते। विभक्तिपदार्थस्य ज्ञानं यावत् पर्यन्तं न भवति तावत् पर्यन्तं "न विभक्तौ तुस्माः" इति सूत्रस्य वाक्यार्थबोधो न सम्भवति। "विभक्तिश्च" इति सूत्रेण सुप्तिङोः विभक्तिसंज्ञा विधीयते। अतः विभक्तिज्ञानं सुप्तिङोः ज्ञानाधीनम्। सुप्तिङोः ज्ञानम् "आदिरन्त्येन सहेता" इति सूत्रस्य वाक्यार्थबोधोत्तरमेव सम्भवति। तच्च "हलन्त्यम्" इति सूत्रस्य वाक्यार्थबोधाधीनम्। अतः परस्परापेक्षरूपदोषः अत्रापि वर्तते। एवञ्च पूर्ववत् "हलन्त्यम्","न विभक्तौ तुस्माः" इत्यनयोः सूत्रयोः अन्योन्याश्रयदोषो भवति।"आदिरन्त्येन सहेता", "हलन्त्यम्" इत्यनयोः सूत्रयोः अन्योन्याश्रयस्य समाधानेऽपि "हलन्त्यम्" “न विभक्तौ तुस्माः” इत्यनयोः सूत्रयोः तादृशः दोषः तदवस्थ एव। उभयस्थले अन्योन्याश्रयदोषपरिहारविचारः इह प्रस्तूयते।

**बीजशब्दाः–अन्योन्याश्रयदोषः,हलन्त्यम्,आदिरन्त्येन सहेता,न विभक्तौ तुस्माः,अपवादविषयः,इत्,प्रत्याहारः**

**हलन्त्यम्, आदिरन्त्येन सहेता इत्यनयोः अन्योन्याश्रयदोषपरिहारः**

अन्योन्याश्रयदोषग्रस्तं लक्षणं प्रामाणिकं न भवति। अन्योन्याश्रयत्वं हि परस्परापेक्षत्वम् उत स्वज्ञप्त्यधीनज्ञप्तिकत्वम्। वाक्यार्थबोधे द्वयोः परस्परापेक्षा वर्तते चेत् अन्योन्याश्रयदोष इति कथ्यते। “हलन्त्यम्”[1], “आदिरन्त्येन सहेता”[2] इत्यनयोः सूत्रयोः अर्थबोधे परस्परापेक्षा वर्तते। हलन्त्यम् इति सूत्रे हल्पदार्थज्ञानम् “आदिरन्त्येन सहेता” इति सूत्राधीनम्। हल् इति प्रत्याहारज्ञानम् आदिरन्त्येन सहेता इति सूत्रादेव जायते। हल्पदार्थज्ञानं विना हलन्त्यमिति सूत्रस्य अर्थबोधःन भवति। प्रत्याहारनिर्माणाय “आदिरन्त्येन सहेता” इत्यस्य वाक्यार्थबोधोऽपेक्ष्यते। वाक्यार्थबोधे पदपदार्थोपस्थितिः कारणमिति न्यायः। आदिरन्त्येन सहेता इति सूत्रस्यार्थबोधः इत्पदज्ञानं विना न भवति। उपदेशेऽन्त्यस्य हलः इत्संज्ञा विधीयते इति इत्पदस्यार्थज्ञानं हलन्त्यमिति सूत्राधीनम्।

हल्पदार्थस्य ज्ञानम् इत्पदार्थज्ञानाधीनम्, इत्पदार्थस्यज्ञानं हल्पदार्थज्ञानाधीनम्। परस्परज्ञानाधीनत्वात् अन्योन्याश्रयदोषः। अन्योन्याश्रयकार्याणि न भवन्ति “अन्योन्याश्रयाणि कार्याणि न प्रकल्प्यन्ते” इति भाष्ये उक्तत्वात्। अन्योन्याश्रयदोषपरिहाराय हलन्त्यमिति सूत्रस्य आवृत्तिः कृता दीक्षितेन। सिद्धान्तकौमुद्यां हलन्त्यमिति सूत्रद्वयं पृथक्-पृथक् प्रदर्शितम्। हल् इति सूत्रे अन्त्यम् इत्स्यादिति प्रथमसूत्रस्यार्थः। उपदेशे अन्त्यं हल् इत्स्यादिति द्वितीयस्यार्थः। शेखरेऽपि अन्योन्याश्रयदोषपरिहाराय विचारः प्रवृत्तः। तत्र मतान्तराण्यपि प्रदश्र्य प्रत्याख्यातानि। तेषु मतेषु एकं प्राचीनमतमिदम्।“आदिरन्त्येन सहेता” इति सूत्रे सह इता इति सन्धिविच्छेदः कृतः। अत्र इत् इति पदं नेत्संज्ञकम्। इता इति न तृतीयान्तं पदम् अपितु प्रथमान्तं पदम्। “इण् गतौ” धातोः तृच्प्रत्यये “आङ्” उपसर्गेण सम्बन्धे “ओमाङोश्च[3]” इति पररूपे प्रथमैकवचने सहेता इति रूपं निष्पन्नम्। सह=समम् आ=समन्तात् एति=गच्छतीति सहेता नाम मध्यमो वर्णः। अतः अन्योन्याश्रय दोषो नास्ति इति प्राचीनानां मतम्। तत्तु न युक्तम्। अन्योन्याश्रयतत्परिहारादीन् वदता भाष्यकारेण कटी वी इत्यत्र

---

[1] अ.सू.१/३/३

[2] अ.सू.१/१/७

[3] अ.सू.६/१/९४

प्रश्लिष्टादीङ्गताविवत्यत इण् गताविवत्यतश्च सहाङ्पूर्वात्तृजभावबोधनात्[4] इति शेखरे उक्तम्। अत्र सन्दर्भे मञ्जर्यां सहेतेति रूपसिद्धिः कथमिति विषये मञ्जरीकृता विशेषः प्रदर्शितः।

सह पूर्वः इण् धातुर्वा अन्यो वा विचारणीयम्। यदि इण् धातुः स्यात् तर्हि "एत्येधत्यूठ्सु"[5] इति पररूपं बाधित्वा वृद्धिः प्रवर्तते। तथा सति उपैति इतिवत् रूपं स्यात्। अतः नाऽयम् इण्धातुः किन्तु इङादिधातुः ग्राह्यः। ततः तृच्प्रत्यये सह आ एतृ इत्यवस्थायाम् "एङि पररूपम्"[6] इति पररूपे ततः सहशब्देन "ओमाङोश्च"[7] इति पररूपे सहेता इति रूपं निष्पद्यते। इण् गतौ इति अपपाठ इति व्याख्यात्रा स्पष्टीकृतम्।

केचित्तु पूर्वं धातुरुपसर्गेण युज्यते पश्चात् साधनेन इति पक्षमवलम्ब्य धातूपसर्गप्रयुक्तं कार्यं प्रथमतः कृत्वा ततः पररूपं कुर्वन्ति। वस्तुतस्तु वृद्धेः निरवकाशत्वेन तन्मतं न युक्तम्। किञ्च पूर्वं धातुरुपसर्गेण युज्यते इति न सिद्धान्तपक्षः इत्यपि मञ्जरीकृता स्पष्टीकृतम्[8]।

अन्योन्याश्रयदोषपरिहारे हल्पदस्यैव आवृत्तिः भाष्यतः लभ्यते। एकेन हल्पदेन हल्प्रत्याहारः ग्राह्यः। अन्येन हल्पदेन हस्य ल् हल् इति हल्सूत्रस्थः लकारः गृह्यते। एतदपेक्षया ज्ञानगौरवपरिहाराय सम्पूर्णसूत्रावृत्तिः मूले प्रदर्शिते व्याख्याने स्पष्टम्। हल्पदस्यावृत्तिरिति भाष्यव्याख्याने हसमीपः लकार इति हलरूपान्त्यञ्चेति कैयटेनोक्तम्। तदर्थप्रदर्शने मूले हल् इत्सञ्ज्ञं भवति हलन्त्यञ्चेदिति वदेदित्यूह्यमिति उक्तम्[9]। सम्पूर्णसूत्रावृत्तिरेव भाष्यसम्मतेति न तु हल्पदावृत्तिरिति शेखरकृता स्पष्टीकृतम्। केचित्तु हल् च हल् च हल् इति भाष्ये एकवचननिर्देशात् विभक्त्यन्तैकशेषः विवक्षित इति अभिप्रयन्ति। वस्तुतस्तु हस्य ल् हल्, हल् च हल् च हल् इति कैयटोक्तव्याख्याने इव हल् च हल् च हल् इति व्याख्यानेऽपि प्रत्याहारपरहल्शब्दः पुंल्लिङ्गः। सूत्रपरहल्शब्दः नपुंसकलिङ्गः। उभयोः एकशेष "नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्[10]" इति सूत्रेण एकशेषे एकपदभावे च कृते एकवचननिर्देशस्य उपपत्त्या विभक्त्यन्तैकशेषाङ्गीकारः विफल इति मञ्जरीकृता स्पष्टीकृतम्। सहविवक्षायामेव एकशेषः

---

[4] ल.शे.पृ.२८

[5] अ.सू.६/१/८८

[6] अ.सू.६/१/९३

[7] अ.सू.६/१/९४

[8] ल.शे.म.पृ.३०

[9] ल.शे.प्र.२९

[10] अ.सू.१/२/६९

प्रवर्तते इति सिद्धान्तः। भाष्यप्रामाण्यात् “द्विर्वचनेऽचि”[11] इत्यादौ एकशेषस्थले असहविवक्षा स्वीकारेऽपि सापेक्षस्थले हलन्त्यमित्यादौ एकशेषस्वीकारः न युक्तः। तेन विभक्त्यन्तैकशेषं स्वीकृत्य अन्त्यपदार्थसापेक्षस्यापि हल्पदस्य एकशेषो भवतीति समन्वयं कृतवतां मतं प्रत्याख्यातम्। वस्तुतस्तु अन्त्यपदस्य हल्पदद्वयेऽपि सम्बन्ध इति सापेक्षतैव नास्ति। किञ्च समासघटकषष्ठ्यर्थस्य सम्बन्धत्वेन बोधात् सहविवक्षा अस्त्येव। तस्मात् एकवचनप्रयोगेऽपि न्याय्य एव एकशेष इति मञ्जर्यां स्पष्टं वर्तते।

इत्थं हल् च हल् च हलिति भाष्यव्याख्याने मतान्तराणि प्रदर्श्य वस्तुतः एकशेषनिर्देशाद्वा सिद्धमिति भाष्यस्यैकशेषपदेन लक्षणया हल्पदे अन्त्यपदे च तन्त्रमेव विवक्षितमिति एकशेषस्य प्रसक्तिरेव नास्ति। तन्त्रञ्च विभक्त्यन्ततन्त्रमिति उद्योतकारस्य आशय इति मञ्जरीकृता स्पष्टीकृतम्[12]। एतादृशक्लेशम् असहमानः भट्टोजिदीक्षितः सम्पूर्णसूत्रावृत्तिं कृत्वा अन्योन्याश्रयदोषं परिहृतवान्। शेखरकारस्यापि सम्पूर्णसूत्रावृत्तावेव निर्भर इति बोध्यम्। अत एवोक्तं मञ्जरीकृता यद्यपि पदद्वयावृत्तिः भाष्यतः लभ्यते तथापि अन्ते षष्ठ्यर्थान्वयक्लेशम् असहमानः मूलकृत् सम्पूर्णसूत्रस्यैवावृत्तिं प्रदर्शितवान् इति। चन्द्रिकाकृताऽपि अयमेवाशयः व्यक्तीकृतः[13]।

**हलन्त्यम्, न विभक्तौ तुस्माः इत्यनयोः अन्योन्याश्रयदोषपरिहारः**

हलन्त्यमिति इत्सञ्ज्ञाविधायकं सूत्रम्।"न विभक्तौ तुस्माः" इति इत्सञ्ज्ञानिषेधसूत्रम्। विभक्तिघटकानां तवर्गसकारमकाराणाम् इत्संज्ञा निषिध्यते अनेन सूत्रेण। अतः"हलन्त्यमिति" उत्सर्गसूत्रम्,"न विभक्तौ तुस्माः" भवति अपवादसूत्रम्। अपवादसूत्रस्य वाक्यार्थबोधानन्तरम् उत्सर्गसूत्रस्य वाक्यार्थबोधः इति नियमोऽस्ति।"न विभक्तौ तुस्माः" इति सूत्रस्य अपवादतया तस्य पूर्वं वाक्यार्थबोधः आवश्यकः। परन्तु वाक्यार्थबोधे पदपदार्थोपस्थितिः कारणम् इत्यपि नियमो वर्तते। अत्र सूत्रे विभक्तिपदं वर्तते। विभक्तिपदार्थस्य ज्ञानं यावत् पर्यन्तं न भवति तावत् पर्यन्तं "न विभक्तौ तुस्माः" इति सूत्रस्य वाक्यार्थबोधो न सम्भवति। "विभक्तिश्च" इति सूत्रेण सुप्तिङोः विभक्तिसंज्ञा विधीयते। अतः विभक्तिज्ञानं सुप्तिङोः ज्ञानाधीनम्। सुप्तिङोः ज्ञानम् "आदिरन्त्येन सहेता" इति सूत्रस्य वाक्यार्थबोधोत्तरमेव सम्भवति। तच्च "हलन्त्यम्" इति सूत्रस्य वाक्यार्थबोधाधीनम्। परस्परापेक्षितत्वेन

---

[11] अ.सू.१/१/५९

[12] ल.शे.म.पृ.३१

[13] ल.शे.च.पृ.२९

"हलन्त्यम्," "न विभक्तौ तुस्माः" इत्यनयोः अन्योन्याश्रयदोषः प्रसज्यत इति मूले शङ्का कृता। अपवादवाक्यार्थबोधात् पूर्वं पदपदार्थोपस्थितौ उत्सर्गवाक्यार्थबोधे प्रतिबन्धकं नास्ति इति समाहितम्। किञ्च अभावज्ञाने प्रतियोगिज्ञानमावश्यकम्। यस्याभावः स प्रतियोगी। यथा पटाभावः इति। अत्र अभावज्ञाने पटज्ञानस्यावश्यकता अस्ति। परन्तु प्रतियोगिज्ञाने अभावज्ञानं नावश्यकम्। प्रतियोगिज्ञानं विना वाक्यार्थबोधो न सम्भवति इति शेखरकृता समाहितम्।

ननु अपवादशास्त्रस्य वाक्यार्थबोधं विना उत्सर्गशास्त्रस्य वाक्यार्थबोधो भविष्यति तर्हि अनिष्टापत्तिः भवति। किञ्च इष्टस्थले निषेधशास्त्रविषये उत्सर्गशास्त्रस्य प्रवृत्तौ "भुक्तवन्तं प्रति मा भुक्थाः" किं तेन कृतम् इति न्यायेन निषेधशास्त्रं व्यर्थं भविष्यत। अत एव "पूर्वं ह्यपवादाः अभिनिविशन्ते पश्चाद् उत्सर्गाः इति न्यायः" भाष्ये पठितः।

वस्तुतस्तु "पूर्वं ह्यपवादाः अभिनिविशन्ते पश्चादुत्सर्गाः" इत्यस्यायं भावः यत् लक्षणैकचक्षुष्कस्य उद्देश्यतावच्छेदकावच्छिन्ने सर्वत्रोत्सर्गकृत-संस्कारबुद्धावुत्सर्गापवादयोर्विषयव्यवस्थानापत्त्या भुक्तवन्तं प्रति मा भुक्था इति वाक्यस्येवापवादशास्त्रवैयर्थ्यापत्त्या चापवादशास्त्रपर्यालोचनेन तद्विषयलक्ष्यसंस्कारं निर्णीय तदविषयं तत्तल्लक्ष्यं तत्तद्विषयवाक्योपप्लवद्वारोत्सर्गेण संस्करोति, अन्यथा विकल्पापत्तिरिति शेखरे प्रदर्शितम्[14]। अत्र संदर्भे भुक्तवन्तः प्रति मा भुक्थाः इति न्याये "भुक्थाः" इति प्रयोगविषये मञ्जर्यां विचारः कृतः। क्वचित् भुक्थाः इति पाठः, कुत्रचित् भुङ्क्थाः इति पाठो दृश्यते। वस्तुतस्तु अस्य धातोः श्नमविकरणत्वेन लुङि श्नमः अप्राप्त्या मा भुक्थाः इति निरनुस्वारः पाठ एव न्यायः। अत्र शङ्का जायते निषेधार्थकः निरनुबन्धः मा शब्दोऽपि वर्तते "माङि लुङ्"[15] इति सूत्रेण सानुबन्धक-मा-शब्दयोगे एव लुङ् प्रवर्तते। प्रकृते निषेधार्थकः निरनुबन्धः "मा" शब्दः उपपदं वर्तते। तस्मिन्नुपपदे लङि सानुस्वारः पाठः युक्त एवेति केचन अभिप्रयन्ति। तन्न युक्तम्। "आङ्माङोश्च"[16] इति सूत्रस्थेन माङः विशिष्टस्य ग्रहणं किमर्थम्। प्रतिषेधार्थकसम्प्रत्यायार्थम् इति भाष्येण निरनुबन्धकः प्रतिषेधार्थकः मा शब्दो नास्तीति "माङि लुङ्" इति सूत्रे शेखरकृता उक्तम्। प्रतिषेधार्थकः निरनुबन्धकः मा शब्दः यदि स्यात्तर्हि ङकाररहितेन माशब्देनाऽपि प्रतिषेधार्थकसम्प्रत्ययात् माङ् इति ङकारोच्चारणस्य तत्प्रयोजनप्रतिपादकवार्तिकस्य च वैयर्थ्यापत्तिरिति शेखरकारस्याशयः।वस्तुतस्तु प्रतिषेधार्थकसम्प्रत्ययार्थमिति भाष्ये प्रतिषेधार्थकस्यैव सम्प्रत्ययार्थमिति अवधारणगर्भः समासः। तथा च

---

[14] ल.शे.पृ.३२

[15] अ.सू.३/३/१७५

[16] अ.सू.६/१/७३

“आङ्माङोश्च” इति सूत्रे ङकारस्य उच्चारणाभावे केवलं मा शब्दस्यैवोपादने प्रतिषेधार्थक-मा-शब्दस्य लक्ष्मीपर्याय-मा-शब्दस्य च ग्रहणवारणाय “माङ्” इति ङकारविशिष्टस्य ग्रहणेन तेन प्रतिषेधार्थस्यैव ग्रहणम्। माङिति सानुबन्धग्रहणमात्रेण प्रतिषेधार्थकनिरनुबन्धमाशब्दाभावः न हि लभ्यते। एवञ्च प्रतिषेधार्थकः निरनुबन्धः मा शब्दोऽप्यस्ति। अत एव “माऽस्तु”“मा भवतु” इत्यादयः प्रयोगाः उपपद्यन्ते इति मञ्जरीकारः स्वाभिप्रायमाविष्चकार[17]। एवं चेत् स्ववचनस्य शेखरवचनेन साकं विरोधः आगच्छति किल इत्युक्तौ शेखरकारेण यदुक्तं तत्सर्वं प्राचामनुरोधेनेति स्वीयं मतं समर्थयामास मञ्जरीकारः।

“पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः[18]” इति ग्रन्थव्याख्यानसन्दर्भे विशेषधर्मपुरस्कारेण जायमानवाक्यार्थस्य उपयोगित्वं वा उत सामान्यधर्मपुरस्कारेण जायमानवाक्यार्थस्य वेति चन्द्रिकाकृता विशेषरूपेण विचारः कृतः। अभावबुद्धिं प्रति प्रतियोगिज्ञानं कारणम्। यथा- घटाभावज्ञानाय घटज्ञानमपेक्षते। तत्रापि सामान्यधर्मपुरस्कारेण प्रतियोगिज्ञानम् अपेक्षते। तत्र संशयः भवति प्रतियोगिज्ञानार्थं सामान्यशास्त्रस्य सामान्यधर्मपुरस्कारेण वाक्यार्थबोधः जायते किल, सोऽपि प्रवर्तकः भवति वा न वेति। तन्निवृत्तिः चन्द्रिकाकृता कृता।सर्वत्र विशेषज्ञानमेव प्रवर्तकं भवति। सामान्यधर्मपुरस्कारेण जायमानः वाक्यार्थबोधः प्रवर्त्तको न भवति। पुनः प्रश्नः जायते विशेषज्ञानस्य प्रवर्त्तकत्वं भवतु अपवादवाक्यार्थनिश्चयात् पूर्वं विशेषधर्मपुरस्कारेण जायमानस्य विशेषज्ञानस्य प्रवर्त्तकत्वं कुतो न भवतीति। तत्तु न युक्तम्। “न सम्प्रसारणे सम्प्रसारणम्”[19] इत्यादिरीत्या नञ्घटितवाक्यश्रवणमात्रेण बाधकसम्भावनायाः सत्त्वात् अपवादवाक्यार्थनिर्णयात् पूर्वं विशेषज्ञानस्य प्रवर्त्तकत्वं नास्ति। एवञ्च अपवादवाक्यार्थनिर्णयानन्तरमेव विशेषधर्मपुरस्कारेण बोधो भवतीति सैव प्रवृत्युपयोगि इति स्पष्टीकृतः चन्द्रिकाकृता[20] ।

प्रकल्प्य चापवादविषयं तत उत्सर्ग प्रवर्तते[21] इति अन्यः न्यायः। अस्य न्यायस्य समन्वये कैयटनागेशयोः मतभेदः वर्तते। अपवादविषयं परित्यज्य उत्सर्गः प्रवर्तते इति समन्वयं करोति ग्रन्थकारः। तन्मते प्रकल्प्य इत्यस्य परित्यज्येत्यर्थः। “न सम्प्रसारणे सम्प्रसारणम्” इति निषेधवचनात् परस्य यणः प्रथमतः सम्प्रसारणं प्रवर्तते, पूर्वस्य तु तन्निमित्तः प्रतिषेध इति प्रकल्प्य इति न्यायस्य लक्ष्यं प्रकटयामास कैयटः।

---

[17] ल.शे.म.पृ.३३

[18] परि.शे.प.सं.६३

[19] अ.सू.६/१/३७

[20] ल.शे.च.पृ.३३

[21] परि.शे.प.६४

अत्र मते प्रकल्प्य इत्यस्य आत्मनः अपवादविषयं परिकल्प्य इत्यर्थः। “श्वयुवमघोनामतद्धिते”[22] इत्यादिः उत्सर्गः। “न सम्प्रसारणे सम्प्रसारणम्” इति तस्य अपवादः। वस्तुतस्तु प्रकल्प्येत्यस्य कैयटोक्तं विषयं नाङ्गीकरोति नागेशभट्टः। लक्ष्यैकचक्षुष्कः तत्तच्छास्त्रपर्यालोचनं विनापि अपवादविषयं परित्यज्य उत्सर्गेण लक्ष्यसंस्कारं जानीते। अतः लक्ष्यैकचक्षुष्कविषयकः प्रकल्प्येति न्यायः। लक्षणैकचक्षुष्कविषयकः पूर्वं ह्यपवादाः इति न्याय इति ग्रन्थकारमतानुसारेण व्यवस्था बोध्या। एवञ्च लक्ष्यैकचक्षुष्कविषयकस्य प्रकल्प्येति न्यायस्य “न सम्प्रसारणे” इत्यादिः विषयः न भवति।

युवन्शब्दात् द्वितीया बहुवचने परस्य सम्प्रसारणे पूर्वस्य न सम्प्रसारणे इति निषेधे यूनः इति रूपम्। अत्र लक्ष्ये परस्य सम्प्रसारणप्रवृत्तेः प्राक् तदीयवाक्यार्थघटक पदार्थस्यैवासम्भवात् स्वरूपलाभप्राप्तस्य न सम्प्रसारणे इत्यस्य अपवादत्वेन वक्तुमशक्यत्वादिति विशेषं प्रदर्शयामास मञ्जरीकारः[23]।

“न विभक्तौ तुस्माः” इत्यस्य अपवादविषयत्वं कथं निर्णीयते इति विषये कश्चन विचारः प्रवृत्तः चन्द्रिकायाम्। “न विभक्तौ तुस्माः” इति शास्त्रे तुस्मापदार्थज्ञानमात्रेण पादीनां एतद्विषयत्वाभावबुद्ध्या तेषु हलन्त्यम् इतिसूत्रप्रवृत्या सुप्तिङ्पविभक्तिपदार्थज्ञानं सुलभमिति मूलग्रन्थः। तद्व्याख्याने वक्ष्यमाणः विचारः प्रवृत्तः। अत्र शङ्का जायते यदि अपवादवाक्यार्थनिर्णयात् पूर्वम् उत्सर्गस्य विशेषधर्मपुरस्कारेण न बोधकत्वं तर्हि न विभक्तौ तुस्माः अपवादवाक्यार्थनिर्णयात् पूर्वं “हलन्त्यम्” इति सूत्रेण पकारः इत्संज्ञो भवति, ङकारः इत्संज्ञो भवतीति वाक्यार्थद्वयस्याप्यभावेन सुप्तिङ्ज्ञानस्याभावात् सुप्तिङौ विभक्तिसंज्ञौ स्तः इति विभक्तिपदार्थनिर्णयाभावेन न विभक्ताविति अपवादस्य कथमर्थनिर्णय इति शङ्का ग्रन्थकृता समाहिता। न विभक्ताविति अपवादवाक्यार्थाभावेऽपि तद्घटकपदार्थज्ञानस्य सुलभतया वाक्यार्थबोधं प्रति पदार्थज्ञानस्य कारणत्वेन तुस्मापदार्थज्ञानमात्रेण तवर्गादीनां एतच्छास्त्रविषयत्वेऽपि पादीनां एतद्विषयत्वाभावबुद्ध्या तत्र पकारः इत्संज्ञो भवति, ङकारः इत्संज्ञो भवतीति विशेषवाक्यार्थद्वयस्य सुलभत्वात् तावन्मात्रेण सुप्तिङ्पदार्थज्ञानस्य जातत्वेन तद्पूर्वकविभक्तिपदार्थज्ञानं सुलभमिति विस्तृततया व्याख्यातवान् चन्द्रिकाकारः[24]।

पुनरत्र आक्षेपः जायते यत् उक्तरीत्या तवर्गादिभेदेन उत्सर्गप्रवृत्ते बाधकाभावेन पकारङकारविषयकवाक्यार्थद्वयमेव कुतः भवति तवर्गादिभिन्नसकलव्यक्तिविषयक- वाक्यार्थः कुतो न

[22] अ.सू.६/४/११३

[23] ल.शे.म.पृ.३५

[24] ल.शे.च.पृ.३५

भवति किमत्र विनिगमकमिति। चन्द्रिकाकारः स्वयम् आक्षिप्य एवं समाहितवान्- इदानीं विभक्तिस्थाविभक्तिस्थसाधारण्येन तवर्गादिभिन्नः हल् इत्संज्ञो भवतीति अर्थापत्तौ तव्यदादिप्रत्ययस्थानामपि तवर्गादीनाम् इत्संज्ञा न स्यात्। तथा सति अपवादशास्त्रस्य वैयर्थ्यं स्यात्। तथा च पकारङकारान्यविषयकवाक्यार्थजनने तद्विषयकवाक्यार्थजनने च अपवादस्यैव क्रमेण प्रतिबन्धकत्वं कारणत्वञ्च कल्प्यते। इत्थं कार्यकारणभावद्वयस्वीकारेण दोषः वारयितुं शक्यते इति चन्द्रिकायां विशेषः प्रदर्शितः[25]।

**उपसंहारः -**

हलन्त्यमिति उत्सर्गसूत्रम्। सामान्यरूपेण अन्त्यस्थवर्णानाम् इत्संज्ञा विधीयते अनेन सूत्रेण। “न विभक्तौ तुस्माः” इति अपवादसूत्रम्। विभक्तिस्थानां तवर्गसकारमकाराणाम् इत्सञ्ज्ञा निषिध्यते अनेन सूत्रेण। ”हलन्त्यम्” “न विभक्तौ तुस्माः”इत्यनयोः अन्योन्याश्रयो भवति। अपवादसूत्रस्य वाक्यार्थबोधात् प्राक् उत्सर्गसूत्रस्य पदपदार्थोपस्थितौ वाक्यार्थबोधो जायते। अभावज्ञाने प्रतियोगिज्ञानमपेक्ष्यते। प्रतियोगिज्ञाने अभावज्ञानं नावश्यकम्। लक्षणं = पाणिनीयसूत्रम् एकं प्रधानं चक्षुः ज्ञापकं यस्य स लक्ष्यैकचक्षुष्कः। लक्ष्यमेकं प्रधानं चक्षुः ज्ञापकं यस्य स लक्ष्यैकचक्षुष्कः पाणिन्यादिः। परित्यज्य चापवादविषयम् अत्र प्रकल्प्यशब्दस्य परित्यज्यार्थः प्रदर्शितः। कैयटमते तु प्रकल्प्यशब्दस्यार्थो भवति सम्पाद्य इति। पूर्वं ह्यपवादाः अभिनिविशन्ते इत्यत्र अभिनिविशन्ते इत्यस्य बुद्ध्यारूढा भवन्तीत्यर्थः। एवमेते सर्वेऽपि विषयाःव्याकरणसिद्धान्तानां परिशीलनपूर्वकं वैयाकरणैः ज्ञातुं शक्यन्त इति मे अभिप्रायः।

[25] ल.शे.च.पृ.३५

**सङ्केताक्षरसूची:**

**अ.सू** - अष्टाध्यायीसूत्रपाठः

**ल.शे.म**. - लघुशब्देन्दुशेखरः, मञ्जरीव्याख्या

**ल.शे.च**. - लघुशब्देन्दुशेखरः, चन्द्रिकाव्याख्या

**प.शे**. - परिभषेन्दुशेखरः

**परिशीलितग्रन्थसूची -**


1. *अष्टाध्यायी, महर्षिपाणिनिप्रणीता, रामलालकपूरट्रस्ट,बहलगढ़म्, (हरियाणा), १९८८.*
2. *अष्टाध्यायीसूत्रपाठः,महर्षिपाणिनिप्रणीतः,दीक्षितपुष्पाकृतप्रकरणनिर्देशसमन्वितः,संस्कृतभारती,(नवदेहली), २०१०.*
3. *पाणिनीयव्याकरणमहाभाष्यम्,महर्षिपतंजलिविनिर्मितम्,(नागेशभट्टविरचितभाष्यप्रदीपोद्योतभासितेन श्रीमदुपाध्यायकैयटप्रणीतेन भाष्यप्रदीपेन समुल्लसितम्) चौखम्बा-संस्कृतप्रतिष्ठान नवदेहली, २००४.*
4. *वैयाकरणसिद्धान्तकौमुदी, भट्टोजिदीक्षितः, (वासुदेवदीक्षितप्रणीतबालमनोरमाटीकया समलंकृता दीपिकाख्या हिन्दी-व्याख्या-समन्विता ) सं. गोपालदत्तपाण्डेयः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी,२००८.*
5. *लघुशब्देन्दुशेखरः, महामहोपाध्यायनागेशभट्टविरचितः, (पञ्चसन्ध्यन्तः सुबोधिनी-हिन्दीव्याख्योपेतः) व्या. आचार्यविश्वनाथमिश्रः, चौखम्वासंस्कृतप्रतिष्ठानम्, नवदेहली, २००८*
6. *लघुशब्देन्दुशेखरः, महामहोपाध्यायनागेशभट्टविरचितः (बालबोधिनी-भावबोधिनीव्याख्याद्वयोपेतः) व्या.सं. आचार्यश्रीपादसत्यनारायणमूर्तिः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, २००१.*
7. *लघुशब्देन्दुशेखरः, महामहोपाध्यायनागेशभट्टविरचितः (चन्द्रिकामञ्जरीव्याख्या-द्वयोपेतः) व्या.सं. आचार्यश्रीपादसत्यनारायणमूर्तिः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, २०१२.*

8. काशिकावृत्तिः, वामनजयादित्यौ, व्या. पं. ईश्वरचन्द्रः, चौखम्बासंस्कृतप्रतिष्ठानम् नवदेहली, २०१०.

9. पाणिनीयव्याकरणमहाभाष्यम्, महर्षिपतञ्जलिविनिर्मितम्, (श्रीमन्त्रागेशभट्टविरचित-भाष्यप्रदीपोद्योतभासितेन श्रीमदुपाध्यायकैयटप्रणीतेन भाष्यप्रदीपेन समुल्लसितम्) चौखम्बासंस्कृतप्रतिष्ठानम्, नवदेहली, २००५.

10. शब्दकौस्तुभः, भट्टोजिदीक्षितः,सं. प. नेने गोपालशस्त्री, चौखम्बासंस्कृतशृङ्खलाकार्यालयः, वाराणसी,१९९०